# Shri Paramananda Sandoha Kavacham

# श्रीपरमानन्दसन्दोहकवचम्

## Document Information

Text title : Radha Paramananda Sandoha Kavacham

File name : paramAnandasandohakavacham.itx

Category : devii, devI, kavacha, rAdhA

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : June 17, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2026

*sanskritdocuments.org*

# श्रीपरमानन्दसन्दोहकवचम्

ॐ ह्रीं अस्य श्रीपरमानन्दसन्दोहकवचमहास्तोत्रमहामन्त्रस्य, श्रीनारायण ऋषिः, अनुष्टुप् छन्दः, श्रीराधिका त्रिपुरसुन्दरी देवता, श्रीकृष्णदास्यभक्तिप्राप्त्यर्थे पाठे विनियोगः ॥

ऋष्यादिन्यासः ।
ॐ नारायणऋषये नमः शिरसि ।
ॐ अनुष्टुप्छन्दसे नमः मुखे ।
ॐ श्रीराधिका त्रिपुरसुन्दरीदेवतायै नमः हृदि ।
ॐ श्रीकृष्णदास्यभक्तिप्राप्त्यर्थे नमः नाभौ ।
ॐ विनियोगाय नमः सर्वाङ्गे ॥

करन्यासः ।
ॐ ह्रां अङ्गुष्ठाभ्यां नमः ।
ॐ ह्रीं तर्जनीभ्यां नमः ।
ॐ ह्रूं मध्यमाभ्यां नमः ।
ॐ ह्रैं अनामिकाभ्यां नमः ।
ॐ ह्रौं कनिष्ठिकाभ्यां नमः ।
ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ॥

षडङ्गन्यासः ।
ॐ ह्रां हृदयाय नमः ।
ॐ ह्रीं शिरसे स्वाहा ।
ॐ ह्रूं शिखायै वषट् ।
ॐ ह्रैं कवचाय हुम् ।
ॐ ह्रौं नेत्रत्रयाय वौषट् ।
ॐ ह्रः अस्त्राय फट् ॥

अथ कवचम् ।

ॐ सर्वाद्या मे शिरः पातु केशं केशवकामिनी ।
भालं भगवती पातु लोला लोचनयुग्मकम् ॥ १॥

नासां नारायणी पातु सानन्दा चाधरोष्ठकम् ।
जिह्वां पातु जगन्माता दन्तं दामोदरप्रिया ॥ २॥

कपोलयुग्मं कृष्णेशा कण्ठं कृष्णप्रियाऽवतु ।
कर्णयुग्मं सदा पातु कालिन्दीकूलवासिनी ॥ ३॥

वसुन्धरेशा वक्षो मे परमा सा पयोधरम् ।
पद्मनाभप्रिया नाभिं जठरं जाह्नवीश्वरी ॥ ४॥

नित्या नितम्बयुग्मं मे कङ्कालं कृष्णसेविता ।
परात्परा पातु पृष्ठं सुश्रोणी श्रोणिकायुगम् ॥ ५॥

परमाद्या पादयुग्मं नखरांश्च नरोत्तमा ।
सर्वाङ्गं मे सदा पातु सर्वेशा सर्वमङ्गला ॥ ६॥

पातु रासेश्वरी राधा स्वप्ने जागरणे च माम् ।
जले स्थले चान्तरिक्षे सेविता जलशायिनी ॥ ७॥

प्राच्यां मे सततं पातु परिपूर्णतमप्रिया ।
वह्नीश्वरी वह्निकोणे दक्षिणे दुःखनाशिनी ॥ ८॥

नैरृत्ये सततं पातु नरकार्णवतारिणी ।
वारुणे वनमालीशा वायव्यां वायुपूजिता ॥ ९॥

कौबेरे मां सदा पातु कूर्मेण परिसेविता ।
ईशान्यामीश्वरी पातु शतशृङ्गनिवासिनी ॥ १०॥

वने वनचरी पातु वृन्दावनविनोदिनी ।
सर्वत्र सततं पातु सर्वेशा विरजेश्वरी ॥ ११॥

प्रथमे पूजिता या च कृष्णेन परमात्मना ।
षडक्षर्या विद्यया च सा मां रक्षतु कातरम् ॥ १२॥

इति श्रीनारदपञ्चरात्रे श्रीपरमानन्दसन्दोहकवचं सम्पूर्णम् ।

Encoded and proofread by Durga Sharma

*Shri Paramananda Sandoha Kavacham*

pdf was typeset on June 17, 2026

Please send corrections to *sanskrit@cheerful.com*